## हि च। (३४/३०४१)

हि इत्यनेन युक्तं तिङन्तमप्रातिलोम्ये नानुदात्तं भवति। स हि कुरु। स हि पच। स हि पठ। अप्रातिलोम्ये इत्येव, स हि कूज वृषल, इदानीं ज्ञास्यसि जाल्म ॥

## छन्दस्यनेकमपि साकाङ्क्षम्। (३५/३०४२)

हि च इति [1]वर्तते। छन्दसि विषये [2]हियुक्तं तिङन्तं साकाङ्क्षमनेकमपि नानुदात्तं भवति, एकमपि। कदाचिदेकं कदाचिदनेकम् इत्यर्थः। तत्र अनेकं तावत् – अनृतं हि मत्तो वदति, पाप्मा एनं विपुनाति (म. भा. ३. ३७५)। तिङन्तद्वयमप्येतन् न निहन्यते। एकं खल्वपि – अग्निर्हि पूर्वमुदजयत् तमिन्द्रोऽनूदजयत् (म. भा. ३. ३७५) तिङन्तद्वयमपि हिशब्दयुक्तमेतत्। तत्र एकमुदजयत इत्याद्युदात्तम्, अपरमनुदात्तम्। '[3]अजा ह्यग्नेरजनिष्ट गर्भात् सा वा अपश्यज् जनितारमग्ने' (तै. ४.२.१०.४)। अजनिष्ट इत्याद्युदात्तम्, [4]अपश्यत् इत्यनुदात्तम् ॥

## यावद्यथाभ्याम्। (३६/३०४३)

यावत् यथा इत्येताभ्यां युक्तं तिङन्तं नानुदात्तं भवति। यावद् भुङ्क्ते। यथा भुङ्क्ते। यावद् अधीते। यथा अधीते। देवदत्तः पचति यावत्। देवदत्तः पचति यथा। परेणापि योगे भवति [5]प्रतिषेधः ॥

## पूजायां नानन्तरम्। (३७/३०४४)

यावद् यथा इत्येताभ्यां युक्तमनन्तरं तिङन्तं पूजायां विषये नानुदात्तं न भवति, किं तर्हि, अनुदात्तमेव[6]। यावत् पचति शोभनम्। यथा पचति शोभनम्। यावत् करोति चारु। यथा करोति चारु। पूजायाम् इति किम्? यावद् भुङ्क्ते। यथा भुङ्क्ते। अनन्तरम् इति किम्। यावद् देवदत्तः पचति शोभनम्। यथा [7]देवदत्तः करोति चारु। पूर्वेणात्र निघातः प्रतिषिध्यते ॥

## उपसर्गव्यपेतं च। (३८/३०४५)

यावद्यथाभ्यां युक्तं उपसर्गव्यपेतं [8]च पूजायां विषये नानुदात्तं न भवति, किं तर्हि, अनुदात्तमेव [9]भवति। पूर्वमनन्तरं इत्युक्तम्, उपसर्गव्यवधानार्थो[10]ऽयमारम्भः। यावत् प्रपचति शोभनम्। यथा प्रपचति[11]शोभनम्। यावत् प्रकरोति चारु। यथा प्रकरोति चारु[11]। अनन्तरमित्येव, यावद् देवदत्तः प्रपचति[12]। यथा विष्णुमित्रः प्रकरोति चारु ॥

---

1. वर्तते नास्ति ह. 2. इत्यनेन इत्यधिकम् क.ह. 3. अजो क. 4. अपरम् इ. 5. प्रतिषेधः नास्ति ड. 6. पूर्वेण प्राप्नोति निघातप्रतिषेधः इत्यधिकम् क. 7. विष्णुदत्तः ई. 8. च नास्ति ड. 9. भवति नास्ति ब.ड. 10. वचनारम्भः ब.ह. 11. चारु क. 12. चारु इत्यधिकम् ड, शोभनम् इत्यधिकम् ब.